**श्रीसुरसरस्वतीसभा, शृङ्गेरि**

**तुरीया परीक्षा**

**प्रथमपत्रिका**

दिनाङ्कः - 03-09-2023 अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

1 **पञ्चानाम् एकवाक्येन उत्तरं लिखत ।** 5

१. उदयनस्य माता का ?

२. श्रीशङ्कराचार्याः कस्मिन् लग्ने जाताः ?

३. पाण्डुना बलवत् मर्मणि ताडितस्य मृगरूपधरस्य महर्षेः नाम किम् ?

४. कः अजोऽपि जन्म गृह्णाति ?

५. सर्वोपकारक्षमः आश्रमः कः ?

६. के सत्पुरुषाः ?

७. 'चन्द्रोदयवर्णनम्' इति पाठः कस्मात् ग्रन्थात् स्वीकृतः ?

८. विदर्भराजः कः ?

2 **पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** 10

१. नीचमध्यमोत्तमाः के ?

२. 'शङ्कर' इति नाम कथं सार्थकम् आसीत् ?

३. शृङ्गगिरौ शङ्करः किम् अपश्यत् ? तेन स किमचिन्तयत् ?

४. 'मा भूत् परीवादनवावतारः' कीदृशः सः परीवादः ?

५. सप्तर्षीणां पदम् अर्कात् सोमादपि उच्चतरं कथम् आसीत् ?

६. स्वयंवरार्थम् आगच्छन्तं नलं दृष्ट्वा देवाः किम् अवोचन् ?

७. भीष्मेण स्वपरिचयं पृष्टो द्रोणः किमवदत् ?

**3 द्वयोः विस्तरेण (सप्ताष्टभिर्वाक्यैः) उत्तरं लिखत ।** **8**

१. हुतभुग्कृतस्य खाण्डववनभक्षणस्य वृत्तान्तं वर्णयत ।

२. हस्तामलकस्य पूर्ववृत्तं वर्णयत ।

३. उदयनस्य औदार्यं विशदयत ।

४. इन्द्राग्नियमवरुणैः नलाय के के वराः दत्ताः ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. वत्से! मा शुचः । कञ्चित्कालमत्रैवाश्रमे वस ।

२. कोटीश्चतस्रो दश चाहरेति ।

३. प्रासोष्टातिमहसं सुखेन सूनुम् ।

४. हिंस्रस्य दमनाय हि राज्ञां शस्त्रं न तु कृपणजनक्लेशाय ।

५. विधेहि प्रथमं स्वतन्त्रमेकं ग्रन्थरत्नम् ।

**5 द्वयोः भावं विशदयत ।** **8**

१. द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥

२. सार्थास्यां व्यजयत गुर्विणीति वाणी वर्धिष्णुर्भुवनगुरुर्यतो विवेश ।
अङ्गानां कृशतां विलोक्य लोकः क्षीणत्वं भुवि बुबुधे परेषु भावि ॥

३. स्थितः ककुद्मानिव तीक्ष्णशृङ्गो महाचलः श्वेत इवोच्चशृङ्गः ।
हस्तीव जाम्बूनदबद्धशृङ्गो रराज चन्द्रः परिपूर्णशृङ्गः ॥

४. भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान् महाभाग! तयातिशेषे ।
व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. विद्या .................. पशुः ॥

२. आयुः .................. प्राणिनाम् ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** **4**

१. कालिदासः  २. लक्ष्मणशास्त्री

**8 एकस्य लघुटिप्पणीं लिखत ।** **4**

१. कुन्ती  २. कौत्सस्य गुरुभक्तिः

**9 चत्वारि पदानि वाक्ये योजयत ।** **4**

१. नयनानन्दकरः  २. जाम्बूनदम्  ३. अवदत्

४. प्रथिता  ५. आरात्  ६. भुजिष्या

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. दुर्वासाः  २. भानुमन्तम्  ३. उक्त्वा

४. भैमी  ५. निनाय  ६. अयुज्यत

**11 चतुर्णां पर्यायपदानि लिखत ।** **4**

१. शीतांशुः  २. गाङ्गेयः  ३. शरव्यः

४. उप्तम्  ५. भेकः  ६. अन्वयुङ्क्त

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

१. पञ्चनली  २. विद्याविहीनः  ३. प्राप्तयौवनः

४. इन्द्राग्नियमवरुणाः  ५. सर्वशास्त्रेषु  ६. प्रतिवीथि

**13 चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

१. एवेयम्  २. पौराश्च  ३. उभावपि

४ जन्तूंस्तस्मिन्  ५. पर्यटन्नटवीम्  ६. जगदीशः

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणिलिखत ।** **6**

१. रोचते  २. जीविष्यामि  ३. आसीत्  ४. ददर्श

**15 द्वयोः व्याकरणविशेषं लिखत ।** **4**

१. शिक्षया उत्सुकः  २. व्यजयत  ३. अर्घ्यम्  ४. उपतस्थिरे

**16 समासमेकं सलक्षणं विशदयत ।** 4

१. कर्मधारयसमासः २. अव्ययीभावसमासः

**17 चतुर्थं पदं लिखत ।** 4

| | | | | | | |
|---|---|---|---|---|---|---|
| १. | नीतिशतकम् | – भर्तृहरिः | :: | भारतसङ्ग्रहः | – | ____________ |
| २. | पद्मपादः | – शङ्कराचार्यः | :: | कौत्सः | – | ____________ |
| ३. | निषधः | – नलः | :: | कौशाम्बी | – | ____________ |
| ४. | त्रिलोकी | – द्विगुसमासः | :: | पार्थसारथिः | – | ____________ |

**18 इतरवचनानि लिखत ।** 4

१. अश्वत्थामा _________ _________ ।

२. पपात _________ _________ ।

३. _________ आवयोः, नौ _________ ।

४. _________ _________ आहुः ।

**19 रिक्तस्थानानि पूरयत ।** 4

१. या भाति _______________ भुवि मन्दरस्था ।

२. _______________ हि निसर्गसिद्धा हि निपुणता ।

३. _______________ धर्मम् अवाप्नुहि ।

४. पुत्रम् आत्मनः इच्छति ____________ ।

**20 प्रयोगपरिवर्तनं कुरुत । (एकस्य एव)** 2

१. सद्भावान् शिवगुरुः शङ्करैकभावं कलयति ।

२. दुर्योधनः सूतपुत्रं अङ्गराज्ये अभ्यषिञ्चत् ।

------------------------